# संक्षेपगीता

अथादौ धृतराष्ट्रस्तु सञ्जयं परिपृच्छति ।

कुरुक्षेत्रे समायाताः  किमकुर्वत मत्प्रियाः ॥ १

अवादीत्सञ्जयस्त्वेवं द्रोणं दुर्योधनस्तदा ।

उपसंगच्छते ब्रूते  निबोधयति संस्थितान् ॥ २

ततो रथस्थितः कृष्णः पाञ्चजन्यं धमत्यहो ।

पश्चात्सर्वेऽपि  शङ्खान् स्वीयान् धमन्ति च ॥ ३

धनुरुद्यच्छते पार्थः सोऽपि कृष्णं ब्रवीति वै ।

सेनयोरुभयोर्मध्ये स्थापयेति रथं मम ॥ ४

स्थापिते स्यन्दने तिष्ठन् असौ सर्वान् निरीक्षते ।

दृष्ट्वा बन्धून् गुरुश्चान्यान्  भृशं सीदति खिद्यते ॥ ५

स्रंसते हस्तत श्चापो वेपथुजायते तनौ ।

मनो भ्रमति तेनासौ रथे नैवावतिष्ठते ॥ ६

विसृजत्यात्मनश्चापं  तत्रैवोपविसत्ययम् ।

पुनश्चाववेक्षते सर्वान् तेन खेदोऽभिवर्धते ॥ ७

पशात्प्रभाषते कृष्णं  राज्यं भोगं सुखानि च ।

न काङ्क्षे न च वा भुञ्जे नैव हन्मीति बान्धवान् ॥ ८

कृष्णः संशृणुते सर्वं पुनश्चोपदिशत्यमुम् ।

ज्ञानं  भक्तिं तथा योगं साङ्ख्यं कर्म तथाखिलम् ॥ ९

प्रजाहात्यर्जुनः क्लैब्यं पुनश्चायं न शोचति ।

प्रणश्यति हि सम्मोहः  तेनासौ विन्दते स्मृतिम् ॥ १०

ब्रूते च माधवं पार्थ करिष्ये वचनं तव ।

ततो युद्धाय सन्नाहं कुर्वन्नुत्तिष्ठति स्वयम् ॥११

योऽधीतेऽहर्निशं भक्त्या  धर्म्यं संवादमुत्तमम् ।

स पुण्यकर्मणां लोकान् अवाप्नोति न संशयः ॥ १२